International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(5): 200-203
© 2026 IJMH
www.themultijournal.com

Received: 28-09-2026
Accepted: 19-10-2026
Publish : 21-10-2026

गीताञ्जलिसेठी
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आ.प्र.

Correspondence:
गीताञ्जलिसेठी
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आ.प्र.

श्रीब्रजकिशोरत्रिपाठिनः ऋतुकाव्ये सामाजिकपरिशीलनम्

गीताञ्जलिसेठी

शोधसारांशः

पण्डितप्रवरस्य श्रीब्रजकिशोरत्रिपाठिनः कृतयः साधारणतया भवन्ति - महाकाव्यानि, खण्डकाव्यानि (शतककाव्यानि), ध्यानपरकस्तुतिकाव्यानि, कर्मकाण्डपरकाः ग्रन्थाः, समालोचनात्मकाश्च ग्रन्थाश्च । एतेषु काव्येषु समाजस्य धनात्मकाः (**Positive**) ऋणात्मकाश्चेति (**Negative**) उभयपक्षस्योपस्थापना क्रियते । कस्यापि काव्यस्य सामाजिकाध्ययनसन्दर्भे अधोलिखिताः विषयाः सामान्यतया चर्च्यन्ते । यथा- सामाजिकसंरचनासन्दर्भे समाजे वर्णव्यवस्था, जातिव्यवस्था, पारिवारिकजीवनम्, समाजे नारीणां स्थानम्, समाजस्य विभिन्नवर्गाः यथा - धनिकाः, निर्धनाः, भक्ताः, पापिनः, कुमतयः दुर्जनाः, सज्जनाः इत्यादयः अन्तर्भवन्ति । ततः समाजे जनानामार्थिकजीवनं परिशील्यते, यत्र आजीविकायाः साधनानि - कृषिः, वाणिज्यम्, आर्थिक्यः विषमताः, मुद्रा, करप्रणाली च आलोचनापथे आगच्छन्ति । सांस्कृतिकं धार्मिकं जीवनं पुरस्कृत्य जनानां धार्मिकाः विश्वासाः, सम्प्रदायाः, उत्सवाः, मेलापकाः, मनोरञ्जनानि, रीतिनीतिः, संस्काराः, वस्त्राभूषणानि, खाद्यपेयानि च चर्च्यन्ते । शिक्षा-दर्शन-मूल्यबोधाः कथं समाजं प्रभावयन्ति ? तद्विषये कवेः कः अभिप्रायः तदपि आलोच्यते । अत्र नैतिकमूल्यानि, आदर्शवादः, समाजे प्रचरिताः कुरीतयः, अन्धविश्वासाश्च अन्तर्भवन्ति । एवं सम्पूर्णभावेन काव्यं कथं समाजं प्रभावयति अथवा काव्यं समाजेन कथं प्रभावितमस्ति तदपि विषयवस्त्वालोचनापथे अवतरति । आधुनिकसमाजे चर्च्चितस्य काव्यस्य प्रासङ्गिकता का ? युगीयसमस्यानां चित्रणं समाधानं च कथं कविना क्रियते ? इत्यस्मिन् विषये चर्च्चा क्रियते । एतत्सर्वं मनसि निधाय व्रजकिशोरत्रिपाठिवर्याणां काव्येषु सुप्रसिद्धे ऋतुकाव्ये के के सामाजिकाः विषयाः सन्ति तद्विषये अस्मिन् शोधपत्रे प्रतिपाद्यते ।

कूटशब्दाः – ऋतुकाव्यम्, कृषकजीवनम्, धार्मिकपरम्पराः, आर्थिकविषमता, पारिवारिक- सम्बन्धाः, नारीणाम् स्थितिः, पर्यटनं मनोरञ्जनञ्च, संस्कृतदिवसपालनम्, प्रशासनराजनैतिकव्यवस्था, सामाजिकपरिशीलनम् ।

भूमिका - श्रीमता व्रजकिशोरत्रिपाठिवर्येण रचितम् ऋतुकाव्यं षट्सर्गात्मकं भवति । अत्र षण्णाम् ऋतूनां वर्णना विशेषरूपेण क्रियते । यद्यप्यत्र विविधासु ऋतुषु प्रकृतेः सौन्दर्यं वर्ण्यते तथापि सामाजिकदृष्ट्या अपि अस्य काव्यस्यास्ति महद्वैशिष्ट्यम् । विशेषतया अत्र कृषिजीवनम्, कृषिप्रधान-समाजः, धार्मिक-परम्पराः, उत्सवाः, आर्थिकविषमताः, पारिवारिकसम्बन्धाः, प्रशासनराजनैतिक-व्यवस्थाः, सामूहिकभावना, सामाजिकैकता, शिक्षाव्यवस्थायां छात्राणां मानसिकता, नारीणां सामाजिकस्थितिः, संस्कृतभाषायाः महत्त्वप्रसङ्गे संस्कृतदिवसपरिपालनम्, पर्यटनं मनोरञ्जनमित्यादयः विषयाः नैके प्रतिपादिताः येन काव्यस्यास्य सामाजिकवैशिष्ट्यं स्वतः ज्ञायते । एतेषु केषाञ्चन विषयाणां स्थालीपुलाकन्यायेनात्र उप्सथापना क्रियते ।

1) कृषकजीवनं कृषिप्रधानसमाजश्च

ऋतुकाव्येऽस्मिन् कृषकजीवनं कृषिप्रधानसमाजः च (**Agrarian Society**) इत्यस्य विषयस्य अतीव विस्तृतं, यथार्थं, मर्मस्पर्शि च चित्रणं प्राप्यते । ग्रीष्मर्तौ यदा प्रचण्डातपेन सम्पूर्णं जगद् व्याकुलं भवति,

सामान्यजनाः गृहाद्बहिः गन्तुं न शक्नुवन्ति, तदाऽपि कृषकाः देशस्य खाद्यान्नसुरक्षायै निजक्षेत्रेषु कर्म रताः भवन्ति । ते आतपं घर्माधिक्यं च न गणयन्ति । तदुच्यते कविना –

निर्वायौ दिवसे प्रचण्डसमये स्वेदाढ्यलोको मुहु-
र्ग्रीष्माद्भीतमनास्तथापि चलति स्वक्षेत्रकर्म प्रति ।
हे वर्षातरुणीमणे ! तव दया नो वा कथं जायते ।।
ग्रीष्मोत्तापभयं तदंशुजनितं घातं च घर्मादिकं
नादृत्य श्रमिकास्तथा च कृषका गच्छन्ति कर्मस्थलम् ।
सानन्दं कृषिकर्मधर्मनिरताः शष्यादिसंवृद्धये
सर्वे चेन्निजकार्यसाधनपरा देशे सुखं नर्तिताः ।।६५

एतेन ज्ञायते यत् तत्कालीनसमाजे कृषकाः न केवलं स्वार्थाभिलाषिणः, अपितु सम्पूर्णसमाजस्य पोषणार्थं 'कर्मयोगिनः' इव आचरन्ति स्म । तेषां कठोरश्रमः एव सामाजिकव्यवस्थायाः चक्रं चालयति ।

वर्षर्तुः समागत्य कृषकाणां जीवने नवीनमुत्साहं सञ्चारयति। अस्याम् ऋतौ समाजस्य पुरुषाः (कृषकाः) हलैः भूमिं कर्षन्ति, महिलाः (नार्यः) च मधुरकण्ठरवेण भूमातुः गीतेन वन्दनं कृत्वा धान्याङ्कुररोपणं कुर्वन्ति । तदुच्यते कविना -

पृथ्वी नीलपटावृताऽतिरुचिरा घासाङ्कुरापूरिताद्
वृक्षाः पल्लवितास्ततः कुसुमिताः केचित्सुरूपान्विताः ।
वर्षास्वार्द्रितमेदिनी रसवती गर्भक्षमा जायते
तां दृष्ट्वा कृषकाः प्रमोदमनसा कर्षन्ति भूमिं हलैः ।।१६
वर्षाभिः कृषकाः प्रमोदहृदयाः क्षेत्रं चलन्ति द्रुतं
नानाकर्मविधिं विधाय नितरां कर्षन्ति यानैर्हलैः ।
नार्यः कण्ठरवैस्ततः सुमधुरैः संपूज्य भूमातरं
धान्याद्यङ्कुररोपणे कृतधियो पश्यन्ति नो तद्भयम् ।।६७

अत्र सामूहिककृषिकर्मणि स्त्री-पुरुषयोः समानसहभागितारूपि सामाजिकवैशिष्ट्यं दृश्यते । कृषिः केवलं व्यवसायो नास्ति, अपितु भूमातुः पूजनपरम्परा इव एकः पवित्रः उत्सवः अस्ति, यत्र सङ्गीतस्य उल्लासस्य च समन्वयः प्राप्यते ।

हेमन्तर्तौ यदा धान्यक्षेत्राणि पक्वानि (पीताम्बराभानि) भवन्ति, तदा कृषकसमाजे महती प्रसन्नता दृश्यते । कृषकाः दात्रहस्ताः (हस्ते लवित्रं गृहीत्वा) यन्त्रैः वा धान्यलूनं कुर्वन्ति, खले गो-महिषादीनां साहाय्येन धान्यमर्दनं कृत्वा धान्यधनं गृहम् आनयन्ति, लक्ष्मीपूजां च कुर्वन्ति । तदुच्यते -

रम्ये मार्गशिरे हिमाधिकवशाद्धान्यं सुपक्वं गतं
तद् दृष्ट्वा कृषकाः प्रफुल्लहृदयाः प्रद्यन्ति दात्रैर्मुदा ।
केचिद्यन्त्रबलाल्लुनन्ति ससुखं क्षेत्रे महासम्पदं
तच्छुष्कात्परिगृह्य सादरमहो मुण्डान्नयन्ते खलम् ।।६८
शीते बाला किशलयतुला दात्रहस्ता सुबाला
शस्यार्थं का सरसवदना कृन्तति व्रीहिनालम् ।
मध्ये मध्ये प्रथमरसभाग्चारुगीतातिसक्ता
तल्लावण्यं पिबति तरुणः सादरं कण्ठकीर्त्तिम् ।।६९
शीते व्रीहिनलान् खले कृषिजना गोलेन विस्तीर्य च
यानैर्गोमहिषादिभिश्च दलनं कुर्वन्ति यावन्निशाम् ।
शेषे स्वच्छफलानि के खनिविले यत्नेन रक्षन्ति वै
के विक्रीय तदा धनाय सकलं कार्यं गृहे कुर्वते ।। 70

एतेन ज्ञायते यत् कृषकसमाजे पशूनां (गो-महिषादीनां) महत्त्वम् अत्यधिकं वर्तते । कृषिः पशून् मनुष्यांश्च परस्परं स्नेहसूत्रे बध्नाति । धान्यप्राप्त्यनन्तरं गृहे धनधान्यसमृद्धिः भवति, यया सामाजिकोत्सवाः विवाहकार्याणि च सम्पद्यन्ते ।

कविः केवलं समाजस्य सुखदं चित्रं नोपस्थापयति, अपितु समाजस्य कटुसत्यम् अपि तेन निरूप्यते । अकालवृष्ट्या, वात्याभिः वा यदा शस्यनाशो भवति, तदा कृषकाणां दयनीया स्थितिः भवति, केचित्कृषकाः तु दुःखवशात् प्राणत्यागमपि कुर्वन्ति ।

वात्या वृष्टियुता अकालविपदः कालेऽधुना चेत्कदा
प्रागत्य क्षयसाधने विनिरताः क्षेत्रे फलं नश्यति ।
दुःखार्ताः कृषकाः कपालककरा निन्दन्ति सर्वे विधिं
क्षेत्रे शस्यचयं कथं निजधिया रक्ष्यन्ति वर्षाप्लुताः ।।
दृष्ट्वेदं कृषका निराशहृदयाः क्रन्दन्ति वासे भृशं
शस्यध्वंसवशादसह्यमनसो गच्छन्ति केचिद्दिवम् ।
केचिद्दुःखविमर्दिता जलगतं गृह्णन्ति शस्यं मुहु-
स्साहाय्याय धनं ददाति च तदा किं सर्वकारो लवम् ।।७१

अत्र सामाजिकचेतनायाः स्वरः अस्ति । कविः सर्वकारस्य दायित्वं स्मारयति यत् अकालसमये कृषकाणां साहाय्यं करणीयम् । एषः श्लोकः कृषकसमाजस्य आर्थिकदुर्बलतां मानसिकपीडां च समाजे प्रकटीकरोति ।

2) कृषिप्रधानदेशस्य महत्त्वं कवेः आह्वानञ्च

काव्यस्य अन्ते कविः दृढतया वदति यत् यस्य देशस्य कृषिबलं समृद्धं भवति, स एव देशः विश्वे माननीयो भवति । अतः देशस्य विकाशाय कृषिकर्मणः संवर्धनं परमप्रमुखा सामाजिकी आवश्यकता अस्ति ।

उत्साहः कृषये भवेद्धि नितरां देशाधिपस्याधिकः
प्राधान्यं सुविधां प्रदाय सततं क्षेत्रोन्नतिं साधयेत् ।
शस्यानामुचितार्घसाधनविधौ नो कुण्ठितः कः कदा
नूनं तर्हि कृषिर्विकाशसरणिं देशे जनैर्यास्यति ।।
यद्देशे परिवर्धते कृषिबलं देशः स मान्यः क्षितौ
नाभावोऽपि कदा परस्य हितकृच्छस्येन तस्मात्प्रियः ।
तस्मिन् प्रेमरता भवन्ति सततं देशा धनस्यास्पये
देशे नः कृषिकर्मणाऽपि विभवः संवर्धते सर्वदा ।।७२

"प्राचीनः कथयन्त्यतो निवसते लक्ष्मीः कृषेः कर्मणि" इति ध्येयमन्त्रेण सह कवेः मतमस्ति यत् समाजस्य प्रगतये कृषकाणां शस्यानां च उचितं मूल्यं (उचितार्घः) भवेत्, देशाधिपेन (शासनेन) च कृषिक्षेत्रे उत्साहः उत्पादनीयः ।

3) धार्मिकपरम्पराः उत्सवाः च (Festivals and Religious Customs)

ऋतुकाव्याख्ये ग्रन्थे धार्मिकपरम्पराः उत्सवाः च सजीवतया कविना त्रिपाठिवर्येण चित्रिताः । भारतीयसमाजे ऋतूनां परिवर्तनेन

सह कथं धार्मिक-सांस्कृतिकोत्सवाः परस्परं सम्बद्धाः सन्ति, इति अस्मिन् काव्ये तदत्र आलोच्यते ।

ग्रीष्मस्य प्रचण्डातपेऽपि भारतीयसमाजः स्वकीयाः धार्मिकपरम्पराः न विस्मरति। अस्याम् ऋतौ महाविषुवसंक्रान्तिः, अक्षयतृतीया, सावित्रीव्रतं (पतिप्राणनारीणां व्रतम्), शिव-पार्वत्योः यात्रा च अतीव निष्ठया सम्पाद्यन्ते। तदुच्यते कविना -

देवाशीर्जनतासुखाय सततं शास्त्रे प्रसिद्धिर्जने
संक्रान्तिर्विषुवाख्यकाऽद्य समये ख्याता तÉतीयाऽक्षया ।
सावित्री सधवात्मिका शिवशिवायात्रा च सम्पाल्यते
सूर्याशौर्यभयं निरस्य नितरां मज्जन्ति ते पर्वसु ।।७३

एषः श्लोकः दर्शयति यत् भारतीयसमाजे प्राकृतिकविपदां (यथा प्रचण्डातपस्य) भयं निरस्य उत्सवेषु मज्जनस्य अद्भुतं सामर्थ्यम् अस्ति। सावित्रीव्रतेन कौटुम्बिकनिष्ठा, अक्षयतृतीयादिभिश्च सामाजिकधार्मिकास्था सुदृढा भवति ।

4) श्रीजगन्नाथरथयात्रा

वर्षर्त्तोः आगमनेन सहैव ओडिशायाः विश्वप्रसिद्धा श्रीजगन्नाथस्य रथयात्रा (गुण्डिचायात्रा) तथा च बाहुडायात्रा (पुनरागमनयात्रा) आचर्यते, या सम्पूर्णं समाजम् एकस्मिन् सूत्रे बध्नाति । तद्वर्ण्यते कविना -

वर्षर्त्तौ परिपाल्यते भगवतो यात्रा महास्यन्दने
या नाम्ना खलु गुण्डिचा क्षितितले सर्वप्रसिद्धा सदा ।
तद्यात्रा खलु बाहुडाऽपि नवमे घस्रे स्वनुष्ठीयतेऽ-
मावास्या भुवि चित्रिणी सुखकरी रम्या जनानन्दिनी ।।७४

रथयात्रायाः सामाजिकवैशिष्ट्यम् - रथयात्रा केवलं धार्मिकोत्सवः नास्ति, अपितु एषः 'जनानन्दिनी' अर्थात् सवेर्षां जनानां कृते आनन्ददायकः सामाजिकोत्सवः अस्ति । अत्र जाति-वर्ण-भेदं विहाय सर्वे मानवाः एकत्र मिलित्वा भगवतः रथं कर्षन्ति, यत् सामाजिकसमरसतयाः सर्वोच्चमुदाहरणमस्ति ।

रक्षाबन्धनं भ्रातृ-भगिन्योः पवित्रः सम्बन्धः च - श्रावणपूर्णिमायाः दिने आचर्यमाणं रक्षाबन्धनं भ्रातृ-भगिन्योः स्नेहस्य, समाजस्य रक्षाभावनायाश्च प्रतीकमस्ति। अस्मिन् दिने भगिनी भ्रातुः मङ्गलकामनां करोति । अस्मिन् प्रसङ्गे कविनोच्यते -

अस्मिन् श्रावणपूर्णिमा प्रतिगृहं प्रीत्या जनैः पाल्यते
गोसेवाबलदेवपूजनमहो कुर्वन्ति रम्योत्सवम् ।
भ्रातुर्मङ्गलकांक्षिणी हि भगिनी स्नेहार्थिनी सादरं
रक्षावन्धनमानसा भुजतटे बध्नाति सूत्रं महत् ।।७५

अत्र कौटुम्बिकमूल्यानां रक्षा, नार्यः समाजे आदरणीया भूमिका च प्रदर्श्यते । भ्रातुः हस्ते रक्षासूत्रबन्धनं समाजे परस्परं विश्वासं, सौहार्दं, सुरक्षायै प्रतिवद्धतां च वर्धयति । सहैव गोसेवा-बलदेवपूजनेन पशुधनस्य महत्त्वम् अपि समाजे संस्थाप्यते कविना ।

5) शरदृतौ शक्तिपूजा (दुर्गापूजा) कौमुदी-उत्सवश्च

शरदृतौ आश्विनमासे जगतः कल्याणार्थं भगवत्याः दुर्गायाः नवरात्रपूजनं दशमीतिथौ (विजयादशम्यां) महता आडम्बरेण भवति। सहैव कुमार्यः पूर्णिमातिथौ कुमारपूर्णिमोत्सवं क्रीडाभिः धनधान्यैश्च आचरन्ति । कविनोच्यते -

तच्छुक्ले परमेश्वरी भगवती दुर्गा परा देवता
दातुं विश्वजनाय सर्वकुशलं प्रायाति पृथ्वीपटम् ।
पूते तां नवरात्रके च दशमीतिथ्यां समर्च्यांम्बिकां
याचन्ते बहुमङ्गलं सविनयं ख्याते महापर्वणि ।।
बन्धूराश्विनपूर्णिमातिथिवरे सायाह्नकालागते
दिkये पार्वणशार्वरीश्वरकरे बालाः कुमार्यो मुदा ।
नkया वस्त्रविभूषिताश्च तुलसीं सम्पूज्य पूपादिभिः
प्राhतेष्टा हि विसर्जयन्ति सकलाः क्रीडन्ति मुद्राधनैः ।।७६

दुर्गापूजा समाजस्य 'सर्वकुशलं' (सामूहिककल्याणम्) उद्दिश्य भवति, यत्र जनगणः दुष्टशक्तीनां विनाशाय, समाजस्य रक्षणाय च शक्तिं याचते । कुमारपूर्णिमोत्सवे युवतीनां नूतनवस्त्राणि, क्रीडा, लोकगीतानि च समाजस्य साङ्गीतिकं तथा उल्लासमयं सांस्कृतिकं वैशिष्ट्यं प्रकटयन्ति ।

6) हेमन्त-कार्तिकमासस्य दीपदानं देवपूजनं च

कार्तिकमासः भारतीयसमाजे परमपवित्रः मन्यते । अस्मिन् मासे दीपावली, गोवर्धनपूजा, धन्वन्तरिजयन्ती (स्वास्थ्यरक्षणाय) आचर्यन्ते । वृद्धाः नार्यः 'हविष्यं' (पवित्रं भोजनं) कृत्वा देवालयं गच्छन्ति, दामोदर-राधिका-वृन्दावतीनां (तुलस्याः) च पूजनं कुर्वन्ति। कविनोच्यते –

पुण्ये कार्तिकमासि पूतचरिता वृद्धा हविष्यप्रियाः
प्रातःस्नानमथो समाप्य चपलं गच्छन्ति देवालयम् ।
देवासक्तहृदो नमन्ति नितरां दामोदरं राधिकां
श्रीशम्भुं परिपूजयन्ति च ततो वृन्दावतीदेवताम् ।।
तद्गोवर्द्धनपूजनं वरभिषग्धन्वन्तरीदेवता
गोगोष्ठं किल कालिका च कमला दीपावलीपञ्चकम् ।
श्रीनागस्य दिनं हि सोदरतिथी राधाऽपि धात्रीफलैः
पोतस्यापि महोत्सवोऽखिलजनैः प्रीत्याऽत्र सम्पाल्यते ।।७७

कार्तिकमासस्य परम्पराभिः ज्ञायते यत् भारतीयसमाजे वृद्धानां (विशेषतः मातृसमानवृद्धानाम्) आध्यात्मिकं स्थानं गौरवास्पदं वर्तते । धन्वन्तरीपूजनं स्वास्थ्यचेतनां, गोवर्धनपूजा पर्यावरण-प्रकृतिरक्षणं च सूचयति । 'दीपावलीपञ्चकं' समाजं प्रकाशमयं, तिमिररहितं च कर्तुं प्रेरणां ददाति ।

अनेन प्रकारेण कवेः दृष्ट्या भारतीयसमाजे उत्सवाः केवलं कर्मकाण्डाः न सन्ति, अपितु ते मानवेषु प्रेम, मैत्रीं, प्रशान्तिम्, उल्लासञ्च सञ्चारयितुं प्रमुखाः सामाजिकसेतवः सन्ति । ऋतूनां कष्टं विस्मृत्य समाजः एतैः उत्सवैः एव निरन्तरं जीवन् विकशितः च तिष्ठति ।

उपसंहारः

अस्य शोधपत्रस्य परिसङ्ख्यानेन इदं सुस्पष्टं भवति यत् पण्डितप्रवरस्य श्रीव्रजकिशोरत्रिपाठिनः 'ऋतुकाव्यम्' केवलं प्रकृतेः रमणीयायाः शोभायाः अथवा ऋतूनां परिवर्तनस्य वर्णनात्मकं काव्यं

नास्ति, अपितु एतत् समकालिकस्य समृद्धस्य भारतीयसमाजस्य दर्पणवत् यथार्थं प्रतिबिम्बम् उपस्थापयति ।

काव्येऽस्मिन् सामाजिकव्यवस्थायाः, जीवनशैल्याः, परम्पराणां च बहुविधपरिशीलनं दृश्यते : **(१) कृषकजीवनस्य यथार्थता :** ग्रीष्मस्य प्रचण्डातपे, वर्षायाः आर्द्रायां भूमौ, हेमन्तस्य शीतलवातावरणे च कृषकाणां कठोरपरिश्रमः, राष्ट्रस्य खाद्यान्नसुरक्षायै तेषां 'कर्मयोगिसदृशं' योगदानम्, तथा च अकालवृष्ट्यादिभिः जायमाना तेषां दयनीया स्थितिः सर्वकारेण करणीया सहायता च कवेः प्रखरां सामाजिकचेतनां द्योतयति । (२) **स्त्री-पुरुषयोः समभागिता :** कृषिप्रक्रियासु (विशेषतः रोपण-लवनादिषु) स्त्री-पुरुषयोः समाना सहभागिता, नार्याः भूमातुः अर्चकत्वेन कौटुम्बिक-सामाजिक-उत्सवेषु च आदरणीयं स्थानं निरूपितम् । (३) **सांस्कृतिक-धार्मिक-समरसता :** रथयात्रा (गुण्डिचा-बाहुडा), रक्षाबन्धनम्, दुर्गापूजा, कुमारपूर्णिमा, कार्तिकदीपदानादयः उत्सवाः केवलं कर्मकाण्डरूपाः न भूत्वा समाजस्य विविधवर्गान् एकस्मिन् सूत्रे बध्नन्ति, सामाजिकैकतां समरसतां च वर्धयन्ति । (४) **पर्यावरण-स्वास्थ्य-पशुधनचेतना:** धन्वन्तरिजन्मोत्सव-गोवर्धनपूजा-गोसेवादीनां प्रसङ्गेन कवेः पर्यावरणरक्षणे, स्वास्थ्यविज्ञाने, पशुधनसंवर्धने च दृष्टिः स्पष्टा भवति ।

संक्षेपेण उच्यते चेत्, श्रीव्रजकिशोरत्रिपाठिनः ऋतुकाव्यम् आधुनिक-संस्कृतसाहित्ये सामाजिक-संवेदनायाः, लोकजीवनस्य, राष्ट्रियाभ्युदयस्य च पोषकम् एकं युगानुरूपं महनीयं खण्डकाव्यं वर्तते, यत् आधुनिकसमाजस्य समस्यानां समाधानाय प्रेरणां ददाति।

सहायकग्रन्थसूची

1. **त्रिपाठी, व्रजकिशोर.** *ऋतुकाव्यम्* (षट्सर्गात्मकम्)। परिमलप्रकाशनम्, शक्तिनगर, दिल्ली, 110007 ।
2. **कालिदासः।** *ऋतुसंहारम्*, (सं. व्याख्यासहितम्), चौखम्बा सुरभारती प्रकाशनम्, वाराणसी ।
3. **कालिदासः।** *रघुवंशम्*, (मल्लिनाथकृत-सञ्जीवनीव्याख्यासहितम्), मोतीलाल बनारसीदास, देहली ।
4. **मम्मटभट्टः।** *काव्यप्रकाशः*, (झळकीकरव्याख्यासहितः), भण्डारकर प्राच्यविद्या संशोधन मन्दिरम्, पुणे ।
5. **विश्वनाथकविराजः ।** *साहित्यदर्पणः*, (लक्ष्मीव्याख्यासहितः), चौखम्बा विद्याभवन, वाराणसी ।
6. **भरतमुनिः.** *नाट्यशास्त्रम्*, (अभिनवभारतीव्याख्यासहितम्), गायकवाड ओरियण्टल सिरिज, बडौदा ।
7. **उपाध्यायः, बलदेवः.** *संस्कृत साहित्य का इतिहास*, शारदा निकेतन, वाराणसी ।
8. **द्विवेदी, हजारीप्रसाद.** *कालिदास की लालित्य-योजना*, राजकमल प्रकाशन, नई दिल्ली ।
9. **त्रिपाठी, राधावल्लभ.** *आधुनिकसंस्कृतसाहित्यस्य इतिहासः*, राष्ट्रिय-संस्कृतसंस्थानम्, नवदेहली ।